अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखा
स्नातककार्यक्रमः – दर्शनम्
2025

ज्ञान-विज्ञान विमुक्तये

UGC

विश्वविद्यालय-अनुदान-आयोगः

बहादुरशाह-जफर-मार्गः

नवदेहली – 110002

UGC LOCF Committee (Sanskrit)

Prof. Shrinivasa Varakhedi
Chairperson of the committee and Vice-Chancellor, Central Sanskrit University, New Delhi – 110058
✉ vc@sanskrit.nic.in
Prof. Sukant Kumar Senapati
Vice-Chancellor, Shri Somnath Sanskrit University, Veraval, ✉ sukantsnpt@gmail.com
Prof. Viroopaksha V. Jaddipal
Secretary, Maharishi Sandipani Rashtriya Ved Vidya Pratishthan, Ujjain, ✉ vvjaddipal@gmail.com
Dr. M. V. Natesan
(Retd. Prof.) SSV Kaladi, Kailash Nagar Kolazhy, Biyur, Trichur-10, ✉ natesanskt2000@gmail.com
Dr. Mamta Tripathi
Assistant Professor, Gargi College, University of Delhi, Delhi, ✉ mamtatripathi.jnu@gmail.com

Curriculum Development Committee for B.A. Hons. (Darshanam)

Prof. Sukant Kumar Senapati
Chairperson of the committee and Vice-Chancellor, Shri Somnath Sanskrit University, Veraval,
✉ sukantsnpt@gmail.com
Prof. Narayana Pujar
Professor and Head, Department of Dvaita Vedanta, National Sanskrit University, Tirupati, Andhra Pradesh, ✉ nspm12@gmail.com
Prof. Saroj Kumar Padhi
Professor, Department of Vaidic Darshan, SVDV, Banaras Hindu University, Varanasi, Uttar Pradesh,
✉ sarojbhu@gmail.com
Dr. Gowtham R.
Asst. Professor, Department of Philosophy, University of Patanjali (UoP), Haridwar, Uttarakhand,
✉ gowtham@uop.edu.in
Dr. Srinivasa Kumar N Acharya
Convenor of the Committee and Asso. Professor and HoD, Dept. of Philosophy, Manipal Academy of Higher Education, Manipal, Karnataka, ✉ head.philosophy@manipal.edu

Co-ordination Committee

Dr. G. Surya Prasad
Chief Co-ordinator of the committee and Asst. Professor, Central Sanskrit University, New Delhi – 110058, ✉ dr.gsurya.prasad@csu.co.in
Dr. Yashvant Kumar Trivedi
Asst. Professor, Central Sanskrit University, New Delhi, ✉ dr.yashvant.trivedi@csu.co.in
Dr. Awasthi Sailesh Kumar
Asst. Professor Grade, Central Sanskrit University, New Delhi, ✉ dr.awasthisailesh@csu.co.in
Dr. Kishor Kumar
Asst. Professor Grade, Central Sanskrit University, New Delhi, ✉ dr.kishor_kumar@csu.co.in
Dr. Deepika Dixit
Asst. Professor Grade, Central Sanskrit University, New Delhi, ✉ dr.deepikadixit@csu.co.in

विषयसूची

कार्यक्रमस्य परिचयः 1

कार्यक्रमस्य उद्देश्यानि 3

कार्यक्रमस्य परिणामाः 4

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम् 5

गौणानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम् 8

दर्शनस्नातकानां गुणाः 9

दर्शनस्नातकानां योग्यतासंसूचकानि 10

प्रधानपाठ्यक्रमाणां सञ्चयः 11

गौणपाठ्यक्रमाणां सञ्चयः 13

प्रथमवर्षः (प्रधानपाठ्यक्रमाः) 14

प्रथमसत्रार्द्धः (SEMESTER – 1) 15

प्रधानः पाठ्यक्रमः (MAJOR) 1.1: दर्शनस्य सामान्यपरिचयः 15
प्रधानः पाठ्यक्रमः (MAJOR) 1.2: न्यायदर्शनस्य सामान्यपरिचयः 17
प्रधानः पाठ्यक्रमः (MAJOR) 1.3: वैशेषिकदर्शनस्य सामान्यपरिचयः 20
प्रधानः पाठ्यक्रमः (MAJOR) 1.4: साङ्ख्यदर्शनस्य सामान्यपरिचयः 22
प्रधानः पाठ्यक्रमः (MAJOR) 1.5: प्रायोगिकं योगदर्शनम् 24
प्रधानः पाठ्यक्रमः (MAJOR) 1.6: दर्शनशास्त्रस्येतिहासः (नास्तिकम्) 26

द्वितीयसत्रार्द्धः (SEMESTER - 2) 28

प्रधानः पाठ्यक्रमः (MAJOR) 1.7: बौद्धदर्शनस्य सामान्यपरिचयः 28
प्रधानः पाठ्यक्रमः (MAJOR) 1.8: अद्वैतवेदान्तस्य मूलतत्त्वानि 30
प्रधानः पाठ्यक्रमः (MAJOR) 1.9: विशिष्टाद्वैतवेदान्तस्य मूलतत्त्वानि 33
प्रधानः पाठ्यक्रमः (MAJOR) 1.10: याज्ञीयमन्त्रोपनिषत्परिचयः 35
प्रधानः पाठ्यक्रमः (MAJOR) 1.11: अक्षरपुरुषोत्तमदर्शनम् 37
प्रधानः पाठ्यक्रमः (MAJOR) 1.12 : दर्शनशास्त्रस्येतिहासः (आस्तिकम्) 39

द्वितीयवर्षः (प्रधानपाठ्यक्रमाः) 42

तृतीयसत्रार्द्धः (SEMESTER - 3) 43

प्रधानः पाठ्यक्रमः (MAJOR) 2.1: साङ्ख्याभिमतः तत्त्वोत्पत्तिक्रमः 43
प्रधानः पाठ्यक्रमः (MAJOR) 2.2: योगदर्शनस्य सामान्यपरिचयः 45
प्रधानः पाठ्यक्रमः (MAJOR) 2.3: मीमांसायां प्रतिपाद्यतत्त्वानि 47
प्रधानः पाठ्यक्रमः (MAJOR) 2.4: शुद्धाद्वैते प्रतिपाद्यतत्त्वानि 49
प्रधानः पाठ्यक्रमः (MAJOR) 2.5: निम्बार्कदर्शनस्य परिचयः 51

चतुर्थसत्रार्द्धः (SEMESTER - 4) 53
प्रधानः पाठ्यक्रमः (MAJOR) 2.6: रामानन्ददर्शनस्य परिचयः 53
प्रधानः पाठ्यक्रमः (MAJOR) 2.7: विधिवादः 56
प्रधानः पाठ्यक्रमः (MAJOR) 2.8: अद्वैतदर्शने आत्मतत्त्वविचारः 58
प्रधानः पाठ्यक्रमः (MAJOR) 2.9: विशिष्टाद्वैतसिद्धान्ते कर्मसाङ्ख्ययोगौ 60
प्रधानः पाठ्यक्रमः (MAJOR) 2.10: द्वैतवेदान्तरीत्या ब्रह्मजिज्ञासायाः फलम् 62
तृतीयवर्षः (प्रधानपाठ्यक्रमाः) 64
पञ्चमसत्रार्द्धः (SEMESTER- 5) 65
प्रधानः पाठ्यक्रमः (MAJOR) 3.1 वचनामृतसङ्ग्रहः 65
प्रधानः पाठ्यक्रमः (MAJOR) 3.2: थेरवादस्य तत्त्वज्ञानम् 67
प्रधानः पाठ्यक्रमः (MAJOR) 3.3: द्वैतवेदान्तरीत्या सामान्यतत्त्वानां परिचयः 69
प्रधानः पाठ्यक्रमः (MAJOR) 3.4: वेदापौरुषेयत्वसमर्थनम् 71
प्रधानः पाठ्यक्रमः (MAJOR) 3.5: श्रीमद्भगवद्गीतायां साङ्ख्ययोगौ 73
षष्ठसत्रार्द्धः (SEMESTER – 6) 75
प्रधानः पाठ्यक्रमः (MAJOR) 3.6: वचनामृतसङ्ग्रहे ब्रह्मस्वरूपम् 75
प्रधानः पाठ्यक्रमः (MAJOR) 3.7: समाधिकैवल्ययोः विमर्शः 77
प्रधानः पाठ्यक्रमः (MAJOR) 3.8: साङ्ख्यभाष्यस्य परिज्ञानम् 79
प्रधानः पाठ्यक्रमः (MAJOR) 3.9: अर्थापत्ति-अनुपलब्ध्योः विचाराः 81
प्रधानः पाठ्यक्रमः (MAJOR) 3.10: चतुस्सूत्री 83
चतुर्थवर्षः (प्रधानपाठ्यक्रमाः) 85
सप्तमसत्रार्द्धः (SEMESTER - 7) 86
प्रधानः पाठ्यक्रमः (MAJOR) 4.1: स्वामिनारायणसिद्धान्तसुधा 86
प्रधानः पाठ्यक्रमः (MAJOR) 4.2 न्यायमञ्जर्याः विशिष्टाध्ययनम् 88
प्रधानः पाठ्यक्रमः (MAJOR) 4.3: हठयोगस्य विमर्शः 91
प्रधानः पाठ्यक्रमः (MAJOR) 4.4: पाश्चात्यदर्शनस्य अध्ययनम् 93
प्रधानः पाठ्यक्रमः (MAJOR) 4.5: प्राचीनाधुनिकविज्ञानानि (SCIENCE, PHILOSOPHY, RELIGION, AND TECHNOLOGY) 96
अष्टमसत्रार्द्धः (SEMESTER - 8) 99
प्रधानः पाठ्यक्रमः (MAJOR) 4.6: यतीन्द्रमतदीपिकायाः समीक्षा 99
प्रधानः पाठ्यक्रमः (MAJOR) 4.7: रामानुजीयं भगवद्गीताचिन्तनम् 101
प्रधानः पाठ्यक्रमः (MAJOR) 4.8: वैशेषिकशास्त्रस्य विशिष्टपरिचयः 103
प्रधानः पाठ्यक्रमः (MAJOR) 4.9: न्यायनये शब्दप्रमाणम् 104
प्रधानः पाठ्यक्रमः (MAJOR) 4.10: महायानस्य तत्त्वज्ञानम् 107
प्रथमवर्षः (गौणपाठ्यक्रमाः) 109

गौणः पाठ्यक्रमः (MINOR) 1.क.1: जैनदर्शनस्य सामान्यपरिचयः 110
गौणः पाठ्यक्रमः (MINOR) 1.क.2: न्यायवैशेषिकयोः परिचयः 112
गौणः पाठ्यक्रमः (MINOR) 1.क.3: व्याकरणस्य परिचयः 114

द्वितीयवर्षः (गौणपाठ्यक्रमाः) 116

गौणः पाठ्यक्रमः (MINOR) 2.क.1: धर्मविवेकः 117
गौणः पाठ्यक्रमः (MINOR) 2.क.2: दशगणीज्ञानम् 119
गौणः पाठ्यक्रमः (MINOR) 2.क.3: कारकप्रकरणम् 121

तृतीयवर्षः (गौणपाठ्यक्रमाः) 123

गौणः पाठ्यक्रमः (MINOR) 3.क.1: द्वैतवेदान्तसम्प्रदायस्य प्रमुखाः प्रवर्तकाः 124
गौणः पाठ्यक्रमः (MINOR) 3.क.2: अद्वैतवेदान्तदर्शनेतिहासः 126
गौणः पाठ्यक्रमः (MINOR) 3.क.3: विशिष्टाद्वैतवेदान्तदर्शनेतिहासः 128

चतुर्थवर्षः (गौणपाठ्यक्रमाः) 130

गौणः पाठ्यक्रमः (MINOR) 4.क.1: भारतीयज्ञानपरम्परा 131
गौणः पाठ्यक्रमः (MINOR) 4.क.2: मीमांसाप्रवेशिनी 133
गौणः पाठ्यक्रमः (MINOR) 4.क.3: न्यायसोपानम् 135
गौणः पाठ्यक्रमः (MINOR) 4.क.4: तर्कमतसौरभम् 137
गौणः पाठ्यक्रमः (MINOR) 4.क.5: शाब्दबोधप्रक्रिया 139

कार्यक्रमस्य परिचयः

(Introduction of the Program)

अस्य कार्यक्रमस्य उद्देश्यं तावत् नवीनदृष्टिकोणयुक्तानां छात्राणां सर्वेषां भारतीयदर्शनस्य स्नातकपाठ्यक्रमेषु उन्मुखीकरणम् अस्ति। अयं पाठ्यक्रमः Learning Outcome-Based Curriculum Framework (LOCF) इत्यस्य आधारेण निरूपितःअस्ति, यः विविधविश्वविद्यालयेषु अनुसर्तुं योग्यः विद्यते।

LOCF - पद्धतिः स्नातकस्तरे लक्ष्यकेन्द्रितस्य पाठ्यक्रमस्य प्रस्तुतये उपकरोति। इयं पद्धतिः "छात्रकेन्द्रितायाः शिक्षण-अधिगमप्रक्रियायाः आविष्करणे अत्युपयुक्ता भवति, इति अभिप्रायेण निरूपिता अस्ति। एषा पद्धतिः अधिगमानुभवे स्पष्टतां दार्ढ्यं च समुत्पादयति। अनया पद्धत्या छात्राः यथेच्छं स्वीयपाठ्यक्रमे संलग्नाः भवन्ति। ईदृशः स्नातकपाठ्यक्रमः न केवलं दर्शनविषये शिक्षणं प्रददाति अपितु व्यक्तित्वविकसनेन सह उपजीविकां कल्पयति।

LOCF - पद्धतिः पाठ्यक्रमस्य स्वरूपं विस्तरेण वर्णयति। अपि च पाठ्यक्रमस्य अध्ययनाद् यानि यानि फलानि प्राप्यन्ते, तान्यपि अपि सूचयति। अनया पद्धत्या स्नातकस्तरपाठ्यक्रमात् व्यज्यमानाः गुणाः निर्दिश्यन्ते। एते गुणाः स्वास्थ्यं, भावनात्मकसन्तुलनं, समालोचनात्मकचिन्तनं, सामाजिकन्यायः एवञ्च औद्योगिककौशलानि भवन्ति। अयं कार्यक्रमः छात्रेषु निरन्तराध्ययनयोग्यतां, स्थिरजीवनं च जनयति। भारतीयदर्शनाध्ययनविषये दृष्टिकोणं च परिवर्तयति।

बी.ए. ऑनर्स् (दर्शनम्) इत्यस्मिन् पाठ्यक्रमे विविधदर्शनान्याश्रित्य समीक्षात्मकानि, विमर्शात्मकानि, विशिष्टचिन्तनपराणि लेखनानि रचयितुं स्रोतः समुपलभ्यते। अयं पाठ्यक्रमः अन्तर्विषयात्मकपद्धतिम् अनुसरति यया छात्राः भारतीयदर्शनक्षेत्रस्य संक्षिप्तं, गूढं च परिचयं प्राप्नुवन्ति, ये च अन्यान्विषयान् अपि पठन्ति, तेषु विषयेषु अपि विशिष्टां जिज्ञासां प्राप्नुवन्ति। अयं पाठ्यक्रमः मानवजीवनकौशलेन, सामाजिकविज्ञानेन, अध्यात्मविज्ञानेन च सह सम्बन्धं स्थापयति। अनेन पाठ्यक्रमेण छात्राः भारतीयदर्शनानां विश्लेषणे समस्या-समाधानयोरधिगमने च सामर्थ्यं सम्पादयन्ति।

एषः पाठ्यक्रमः छात्रेषु सर्वोत्तमं बौद्धिकसामर्थ्यं जनयितुं रचितः अस्ति। येन छात्रः व्यक्तित्वविकासं सामाजिकजीवनविकासं च आसादयितुं समर्थः भवेत्।

अयं पाठ्यक्रमः भारतीयदर्शनाध्ययनस्य सामान्यरूपेण प्रचलितान् दृष्टिकोणान् आविष्कर्तुम् अन्यथाधारणां च अपाकर्तुं तद्द्वारा भारतीयदर्शनाध्ययने छात्राणां रुचिं च जनयितुं संरचितः वर्तते। अयं कार्यक्रमः छात्राणाम् अधिकतमां मनोनुकूलतां (Flexibility) कल्पयितुम् आयोज्यते।

अत्र मुख्यविषयान्तर्गतानि पत्राणि सन्ति, यानि भारतीयदर्शनविषये मूलभूतं ज्ञानं, समीक्षात्मकं तार्किकचिन्तनं, तुलनात्मकं ज्ञानं, विवेचनात्मकमध्ययनं च यथावत्प्रयच्छन्ति। अयं पाठ्यक्रमः एवमपि दृष्टिगतः स्यात्, यत्छात्राः स्वस्वरुच्यनुसारं शिक्षां स्वयमेव समनुनयन्तु इति निमित्तेन अनेकविकल्पान् प्रदातुं नियोजितः अस्ति इति।

पाठ्यक्रमोऽयं न केवलं प्राच्यदर्शनेषु अपितु पाश्चात्य-आधुनिकदर्शनेषु च ज्ञानं कौशलं च संवर्धयति। अन्येषु विषयेषु अपि आवश्यकानि कौशलानि संवर्धयति। बी.ए. ऑनर्स् दर्शनपाठ्यक्रमः अन्तश्शास्त्रीयः बहुशास्त्रीयश्च अस्ति। यः विविधदर्शनेषु विशेषज्ञानं प्राप्तुं सहायकः अस्ति्। यश्च अन्यविषयाणां सम्बद्धकौशलानां प्राप्त्युपायः भवति। एतस्य

पाठ्यक्रमस्य मुख्यविषयाः (Core), अन्तश्शास्त्रीयबहुशास्त्रीय-विषयविशेषवैकल्पिकपत्राणां (Interdisciplinary Multidisciplinary Electives), कौशलवर्धनपाठ्यानां (Skill Enhancement Courses) च सम्यक्संयोजनम् आवहति। अनेन भारतीयदर्शनेषु अध्ययनं कुर्वन् छात्रः तदितरसम्बद्धविषयेभ्यः अपि यथायोग्यं ज्ञानं लभते।

स्वरूपं विस्तृतिः च (Nature and Scope)

बी.ए. ऑनर्स् दर्शनपाठ्यक्रमः चतुर्वर्षीयः अस्ति। प्रतिवर्षं द्वै द्वौ सत्रौ भवतः। अतः सम्पूर्णपाठ्यक्रमे अष्टौ सत्राणि भवन्ति। प्रतिसत्रं षोडशसप्ताहपर्यन्तः अध्ययनाध्यापनमूल्याङ्कनकालः निश्चितो भवति। अस्मिन्पाठ्यक्रमे अध्यापनम् अध्ययनं च सैद्धान्तिककक्षाभिः व्याख्यानरूपेण (Lecture) तथा प्रशिक्षणकक्षाभिः (tutorial) सह सम्पन्नं भवति। पाठ्यक्रमः औपचारिकव्याख्यानैः सह अध्याप्यते, यत्र PowerPoint प्रस्तुतीनां, Audio-video उपकरणानां च उपयोगः करणीयः। यथायोग्यमवसरः प्राप्तः चेत् अन्यानिशिक्षणसाधनानि अपि प्रयोक्तुं शक्यन्ते।

केषुचित्पाठ्येषु अतिरिक्तानि अपेक्ष्यानि भवन्ति, यथा – वृत्तचित्रदर्शनम् (Documentary), चलनचित्रदर्शनम्, क्षेत्रकार्यम् (Field Work), अभिलेखसंग्रहणं (Archival Work), विविधविदुषां/संस्थानां दर्शनम् (Interaction With Scholars and Visit To Gurukula), परियोजनायाः कार्यम् (Project Work) इत्यादीनि। एतानि नियमिताध्यापनसहितं सम्यक्समायोज्यन्ते।

कार्यक्रमस्य उद्देश्यानि

(Objectives of the Program)

अस्य पाठ्यक्रमस्य उद्देश्यम् एवं प्रकारेण निर्दिष्टं भवति -

1. भारतीयदार्शनिकपरम्परायाः ज्ञानस्य प्रदानम्।
2. एतत् ज्ञानं समाजस्य श्रेयसि कथम् उपयोगी भवति, इति शिक्षणम्।
3. दार्शनिकाः कथम् अनुसन्धानम् अकुर्वन्, अधुना कुर्वन्ति, कथं तर्कमाश्रित्य तथ्येषु विवादं कुर्वन्तीत्यस्य ज्ञानप्रापणम्।
4. प्राचीनज्ञानपरम्परायाः अध्ययनात् अधुनातनजीवनस्य निर्माणम्।
5. अतीतवर्त्तमानयोः ज्ञानकर्मणोः परस्परसम्बद्धतायाः ज्ञानप्रदानम्।
6. छात्राणां चिन्तनकौशल-जीवनकौशल-विश्लेषणशक्ति-तार्किकचिन्तनानां वर्धनम्।
7. अनुसन्धानाभिमुखदृष्टेः प्रदानम्।

कार्यक्रमस्य परिणामाः

(Program Outcomes)

कार्यक्रमस्य परिणामः – 1	**भारतीयमूलानि -** भारतीयदार्शनिकपरम्परायाः मूलज्ञानं प्रदाय कुशलविश्लेषकचिन्तकानां छात्राणां निर्माणम्।
कार्यक्रमस्य परिणामः – 2	**भारतीयज्ञानपरम्परा** – भारतीयज्ञानपरम्परायै दर्शनशास्त्रयोगदानस्य अवबोधः।
कार्यक्रमस्य परिणामः – 3	**भविष्यवाद्युपागमः -** दर्शनशास्त्रेषु निपुणत्वेन छात्राणां निर्माणम्।
कार्यक्रमस्य परिणामः – 4	**भविष्यवाद्युपागमः** - दर्शनशास्त्रीयसिद्धान्तानां व्यावहारिकानुप्रयोगे कुशलान् छात्रान् निर्माय तेषां नैतिकतासंवर्धनम्।
कार्यक्रमस्य परिणामः – 5	**बहुशास्त्रीयम् -** दर्शनेषु प्रतिपादितान् लोकोपयोगिनः मौलिकान् नियमान् समाजे सप्रमाणं प्रतिपादयितुं समर्थानां छात्राणां निर्माणम्।
कार्यक्रमस्य परिणामः – 6	**वृत्तिप्रदानक्षमता -** छात्रान् व्यावसायिक-विश्लेषणात्मकप्रौद्योगिकी-कौशलेन सुसज्जितान् कृत्वा तेषां वृत्तिसामर्थ्यस्य वर्धनम्।

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

(PROGRAM OUTCOME MAPPING FOR MAJOR COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level काठिन्यस्तरः
दर्शनस्य सामान्यपरिचयः	✓	✓	✓	✓	✓	✓	✓
न्यायदर्शनस्य सामान्यपरिचयः	✓	✓	✓	✓	✓	✓	✓
वैशेषिकदर्शनस्य सामान्यपरिचयः	✓	✓	✓	✓	✓	✓	✓
सांख्यदर्शनस्य सामान्यपरिचयः	✓	✓	✓	✓	✓	✓	✓
प्रायोगिकं योगदर्शनम्	✓	✓	✓	✓	✓	✓	✓
दर्शनशास्त्रस्येतिहासः (नास्तिकम्)	✓	✓	✓	✓	✓	✓	✓
बौद्धदर्शनस्य सामान्यपरिचयः	✓	✓	✓	✓	✓	✓	✓
अद्वैतवेदान्तस्य मूलतत्त्वानि	✓	✓	✓	✓	✓	✓	✓
विशिष्टाद्वैतवेदान्तस्य मूलतत्त्वानि	✓	✓	✓	✓	✓	✓	✓
याज्ञीयमन्त्रोपनिषत्परिचयः	✓	✓	✓	✓	✓	✓	✓
अक्षरपुरुषोत्तमदर्शनम्	✓	✓	✓	✓	✓	✓	✓
दर्शनशास्त्रस्येतिहासः (आस्तिकम्)	✓	✓	✓	✓	✓	✓	✓
साङ्ख्याभिमतः तत्त्वोत्पत्तिक्रमः	✓	✓	✓	✓	✓	✓	✓

योगदर्शनस्य सामान्यपरिचयः	✓	✓	✓	✓	✓	✓	✓
मीमांसायां प्रतिपाद्यतत्त्वानि	✓	✓	✓	✓	✓	✓	✓
शुद्धाद्वैते प्रतिपाद्यतत्त्वानि	✓	✓	✓	✓	✓	✓	✓
निम्बार्कदर्शनस्य परिचयः	✓	✓	✓	✓	✓	✓	✓
रामानन्ददर्शनस्य परिचयः	✓	✓	✓	✓	✓	✓	✓
विधिवादः	✓	✓	✓	✓	✓	✓	✓
अद्वैतदर्शने आत्मतत्त्वविचारः	✓	✓	✓	✓	✓	✓	✓
विशिष्टाद्वैतसिद्धान्ते कर्मसाङ्ख्ययोगौ	✓	✓	✓	✓	✓	✓	✓
द्वैतवेदान्तरीत्या ब्रह्मजिज्ञासायाः फलम्	✓	✓	✓	✓	✓	✓	✓
वचनामृतसङ्ग्रहः	✓	✓	✓	✓	✓	✓	✓
थेरवादस्य तत्त्वज्ञानम्	✓	✓	✓	✓	✓	✓	✓
द्वैतवेदान्तरीत्या सामान्यतत्त्वानां परिचयः	✓	✓	✓	✓	✓	✓	✓
वेदापौरुषेयत्वसमर्थनम्	✓	✓	✓	✓	✓	✓	✓
श्रीमद्भगद्गीतायां साङ्ख्ययोगौ	✓	✓	✓	✓	✓	✓	✓
वचनामृतसङ्ग्रहे ब्रह्मस्वरूपम्	✓	✓	✓	✓	✓	✓	✓
समाधिकैवल्ययोः विमर्शः	✓	✓	✓	✓	✓	✓	✓
साङ्ख्यभाष्यस्य परिज्ञानम्	✓	✓	✓	✓	✓	✓	✓
अर्थापत्ति-अनुपलब्ध्योः विचाराः	✓	✓	✓	✓	✓	✓	✓
चतुस्सूत्री	✓	✓	✓	✓	✓	✓	✓
स्वामिनारायणसिद्धान्तसुधा	✓	✓	✓	✓	✓	✓	✓

न्यायमञ्जर्याः विशिष्टाध्ययनम्	✓	✓	✓	✓	✓	✓	✓
हठयोगस्य विमर्शः	✓	✓	✓	✓	✓	✓	✓
पाश्चात्यदर्शनस्य अध्ययनम् (Study of Western Philosophy)	✓	✓	✓	✓	✓	✓	✓
प्राचीनाधुनिकविज्ञानानि (Science, Philosophy, Religion, and Technology)	✓	✓	✓	✓	✓	✓	✓
यतीन्द्रमतदीपिकायाः समीक्षा	✓	✓	✓	✓	✓	✓	✓
रामानुजीयं भगवद्गीताचिन्तनम्	✓	✓	✓	✓	✓	✓	✓
वैशेषिकशास्त्रस्य विशिष्टपरिचयः	✓	✓	✓	✓	✓	✓	✓
न्यायनये शब्द-प्रमाणम्	✓	✓	✓	✓	✓	✓	✓
महायानस्य तत्त्वज्ञानम्	✓	✓	✓	✓	✓	✓	✓

गौणानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

(PROGRAM OUTCOME MAPPING FOR MINOR COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level कठिनतायाः स्तरः
जैनदर्शनस्य सामान्यपरिचयः	✓	✓	✓	✓	✓	✓	✓
न्यायवैशेषिकयोः परिचयः	✓	✓	✓	✓	✓	✓	✓
व्याकरणस्य परिचयः	✓	✓	✓	✓	✓	✓	✓
धर्मविवेकः	✓	✓	✓	✓	✓	✓	✓
दशगणीज्ञानम्	✓	✓	✓	✓	✓	✓	✓
कारकप्रकरणम्	✓	✓	✓	✓	✓	✓	✓
द्वैतवेदान्तसम्प्रदायस्य प्रमुखाः प्रवर्तकाः	✓	✓	✓	✓	✓	✓	✓
अद्वैतवेदान्तदर्शनेतिहासः	✓	✓	✓	✓	✓	✓	✓
विशिष्टाद्वैतवेदान्तदर्शनेतिहासः	✓	✓	✓	✓	✓	✓	✓
भारतीयज्ञानपरम्परा	✓	✓	✓	✓	✓	✓	✓
मीमांसाप्रवेशिनी	✓	✓	✓	✓	✓	✓	✓
न्यायसोपानम्	✓	✓	✓	✓	✓	✓	✓
तर्कमतसौरभम्	✓	✓	✓	✓	✓	✓	✓
शाब्दबोधप्रक्रिया	✓	✓	✓	✓	✓	✓	✓

दर्शनस्नातकानां गुणाः

(GRADUATE ATTRIBUTES IN DARSHAN)

पाठ्यक्रमस्य समापनानन्तरं छात्राः समालोचनात्मकचिन्तनस्य, युक्तियुक्तपरीक्षणस्य, प्रभावपूर्णसंवादस्य च कौशलानि अर्जयिष्यन्ति। ते प्राच्यपाश्चात्यदर्शनयोः तथाभूतवर्तमान-आध्यात्मिकचिन्तनयोः सम्बन्धं विवेक्तुं शक्नुवन्ति, मानवसमाजस्य अध्ययनाय यः दार्शनिकसम्बद्धविवादः (Philosophical debates) अतीवमहत्वपूर्णः अस्ति, तस्मिन् अपि संवेदनशीलाः भविष्यन्ति। बी.ए. ऑनर्स् (दर्शनम्) पाठ्यक्रमे स्नातकापेक्षिताः निम्नलिखिताः गुणाः भवन्ति -

GA1	भारतीयदर्शनानां तत्परम्परायाश्च ज्ञानं, येन भारतवर्षे प्राचीनकालात् आधुनिककालपर्यन्तं दार्शनानां विकासस्य बोधः स्यात्।
GA2	पाश्चात्यदर्शनानां विकासप्रक्रियायाः पाश्चात्यदर्शनेषु भारतीयदर्शनानां प्रभावः कीदृश इतिबोधः स्यात्।
GA3	जटिलानां दार्शनिकसमस्यानां विवादानां ऐतिहासिकदृष्ट्या सम्यक्पठनं, तत्र उपस्थापितप्रमाणानां मूल्याङ्कनं, तर्कविन्यासस्य सम्यगवबोधः, तस्य समालोचनात्मकविमर्शः च।
GA4	दीर्घकालपर्यन्तं तथा विभिन्न-सांस्कृतिक-भौगोलिकक्षेत्रेषु प्रवृत्तानां दार्शनिकचिन्तनानां प्रतिमानानां (patterns) विश्लेषणक्षमता।
GA5	सामाजिक-सांस्कृतिकविषयेषु दर्शनानां प्रभावः ज्ञायते। ऐतिहासिकदृष्ट्या दर्शनानां विकासस्य परिचयः च ज्ञायते।
GA6	राष्ट्रीयभावनायाः, पुरुषार्थविवेकस्य, मानवमूल्यानां, संविधानमूल्यानां च सम्मानबुद्धिः जायते।
GA7	व्यक्तित्वविकसनं तथा उपर्युक्तविश्लेषणशक्तीनां सम्पादनं भवति।
GA8	संस्कृतौ परम्परायां च श्रद्धा, चिन्तनशक्तेः संवर्धनं देशस्य विविधतायाः अवगमनं च भवति।

दर्शनस्नातकानां योग्यतासंसूचकानि

(QUALIFICATION DESCRIPTORS FOR DARSHAN GRADUATES)

पाठ्यक्रमस्य समुचितरीत्या समापनानन्तरं छात्राः बी.ए. ऑनर्स् (दर्शनम्) इति स्नातकपदवीं प्राप्नुवन्ति। अस्य विभागस्य दर्शनस्नातकाः विभिन्नज्ञानक्षेत्रेषु, औद्योगिकक्षेत्रेषु च संलग्नाः आत्मसंतोषजनकं कार्यं सम्पादयितुं समर्थाः भविष्यन्ति। ते दर्शने प्रमुखानां ग्रन्थानां ज्ञानं सम्पाद्य दर्शनसम्बद्धैः विद्वत्संवादैः सह सम्बन्धं च स्थापयितुं शक्नुवन्ति। एषः ज्ञानप्रकारः दर्शने उच्चशिक्षायाः संशोधनप्रवृत्तौ वा एकः दृढः आधारः भवति। अपि च, विशिष्टविषयकौशलेन सह यानि जीवनोपयोगीनि कौशलानि - यथा तर्कशक्तिः, संवादकौशलं, नूतना दृष्टिः, व्यक्तित्वविकसनं, मूल्याङ्कनबुद्धिः च इत्येतानि अपि दार्शनिकविषयाध्ययनेन विकसितानि भवन्ति। जटिलेऽस्मिन् जीवनसन्दर्भे मानवसमाजस्य उत्कर्षाय दार्शनिकतत्त्वानाम् अध्ययनं कुर्वन्तः एते छात्राः समृद्धं, फलप्रदम्, अर्थपूर्णं च जीवनं नेतुं समर्थाः भवन्ति।

अधोलिखिताः विकल्पाः दर्शनस्नातकपाठ्यक्रमे प्रशिक्षितस्य छात्रस्य उद्योगावकाशान् सूचयन्ति—

- अध्यापनम् अनुसन्धानञ्च।
- नीतिनिर्माणं शासनञ्च।
- धार्मिकसंस्थासु नियुक्तिः।
- सार्वजनिकजीवनं जनप्रतिनिधित्वञ्च।
- पत्रकारितायां तथा समूहमाध्यमेषु कार्यम्।
- सामाजिकसेवा तथा सामाजिककार्यसम्बद्धकार्याणि।
- अभिलेखागारेषु, सङ्ग्रहालयेषु, पुरातत्त्व-अनुसन्धानक्षेत्रेषु च संलग्नता।
- प्रशासनिककार्येषु नियुक्तिः।

प्रधानपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1.	प्रथमवर्षः प्रधानपाठ्यक्रमाः	प्रधानः 1.1: दर्शनस्य सामान्यपरिचयः	4	100-199
2.		प्रधानः 1.2: न्यायदर्शनस्य सामान्यपरिचयः	4	100-199
3.		प्रधानः 1.3: वैशेषिकदर्शनस्य सामान्यपरिचयः	4	100-199
4.		प्रधानः 1.4: साङ्ख्यदर्शनस्य सामान्यपरिचयः	4	100-199
5.		प्रधानः 1.5: प्रायोगिकं योगदर्शनम्	4	100-199
6.		प्रधानः 1.6: दर्शनशास्त्रस्येतिहासः (नास्तिकम्)	4	100-199
7.		प्रधानः 1.7: बौद्धदर्शनस्य सामान्यपरिचयः	4	100-199
8.		प्रधानः 1.8: अद्वैतवेदान्तस्य मूलतत्त्वानि	4	100-199
9.		प्रधानः 1.9: विशिष्टाद्वैतवेदान्तस्य मूलतत्त्वानि	4	100-199
10.		प्रधानः 1.10: याज्ञीयमन्त्रोपनिषत्परिचयः	4	100-199
11.		प्रधानः 1.11: अक्षरपुरुषोत्तमदर्शनम्	4	100-199
12.		प्रधानः 1.12: दर्शनशास्त्रस्येतिहासः (आस्तिकम्)	4	100-199
13.	द्वितीयवर्षः प्रधानपाठ्यक्रमाः	प्रधानः 2.1: साङ्ख्याभिमतः तत्त्वोत्पत्तिक्रमः	4	200-299
14.		प्रधानः 2.2: योगदर्शनस्य सामान्यपरिचयः	4	200-299
15.		प्रधानः 2.3: मीमांसायां प्रतिपाद्यतत्त्वानि	4	200-299
16.		प्रधानः 2.4: शुद्धाद्वैते प्रतिपाद्यतत्त्वानि	4	200-299
17.		प्रधानः 2.5: निम्बार्कदर्शनस्य परिचयः	4	200-299
18.		प्रधानः 2.6: रामानन्ददर्शनस्य परिचयः	4	200-299
19.		प्रधानः 2.7: विधिवादः	4	200-299
20.		प्रधानः 2.8: अद्वैतदर्शने आत्मतत्त्वविचारः	4	200-299
21.		प्रधानः 2.9: विशिष्टाद्वैतसिद्धान्ते कर्मसाङ्ख्ययोगौ	4	200-299
22.		प्रधानः 2.10: द्वैतवेदान्तरीत्या ब्रह्मजिज्ञासायाः फलम्	4	200-299
23.	तृतीयवर्षः प्रधानपाठ्यक्रमाः	प्रधानः 3.1: वचनामृतसङ्ग्रहः	4	300-399
24.		प्रधानः 3.2: थेरवादस्य तत्त्वज्ञानम्	4	300-399
25.		प्रधानः 3.3: द्वैतवेदान्तरीत्या सामान्यतत्त्वानां परिचयः	4	300-399
26.		प्रधानः 3.4: वेदापौरुषेयत्वसमर्थनम्	4	300-399
27.		प्रधानः 3.5: श्रीमद्भगद्गीतायां साङ्ख्ययोगौ	4	300-399
28.		प्रधानः 3.6: वचनामृतसङ्ग्रहे ब्रह्मस्वरूपम्	4	300-399
29.		प्रधानः 3.7: समाधिकैवल्ययोः विमर्शः	4	300-399
30.		प्रधानः 3.8: साङ्ख्यभाष्यस्य परिज्ञानम्	4	300-399
31.		प्रधानः 3.9: अर्थापत्ति-अनुपलब्ध्योः विचाराः	4	300-399

32.		प्रधानः 3.10: चतुस्सूत्री	4	300-399
33.	चतुर्थवर्षः प्रधानपाठ्यक्रमाः	प्रधानः 4.1: स्वामिनारायणसिद्धान्तसुधा	4	400-499
34.		प्रधानः 4.2: न्यायमञ्जर्याः विशिष्टाध्ययनम्	4	400-499
35.		प्रधानः 4.3: हठयोगस्य विमर्शः	4	400-499
36.		प्रधानः 4.4: पाश्चात्यदर्शनस्य अध्ययनम् (Study of Western Philosophy)	4	400-499
37.		प्रधानः 4.5: प्राचीनाधुनिकविज्ञानानि (Science, Philosophy, Religion, and Technology)	4	400-499
38.		प्रधानः 4.6: यतीन्द्रमतदीपिकायाः समीक्षा	4	400-499
39.		प्रधानः 4.7: रामानुजीयं भगवद्गीताचिन्तनम्	4	400-499
40.		प्रधानः 4.8: वैशेषिकशास्त्रस्य विशिष्टपरिचयः	4	400-499
41.		प्रधानः 4.9: न्यायनये शब्द-प्रमाणम्	4	400-499
42.		प्रधानः 4.10: महायानस्य तत्त्वज्ञानम्	4	400-499

गौणपाठ्यक्रमाणां सञ्चयः

क्र.सं.		**पाठ्यक्रमाः**	**पाठ्यक्रम-श्रेयोऽङ्कः**	**पाठ्यक्रम-काठिन्यस्तरः**
1.	प्रथमवर्षः गौणपाठ्यक्रमाः	गौणः 1.क.1: जैनदर्शनस्य सामान्यपरिचयः	4	100-199
2.		गौणः 1.क.2: न्यायवैशेषिकयोः परिचयः	4	100-199
3.		गौणः 1.क.3: व्याकरणस्य परिचयः	4	100-199
4.	द्वितीयवर्षः गौणपाठ्यक्रमाः	गौणः 2.क.1: धर्मविवेकः	4	200-299
5.		गौणः 2.क.2: दशगणीज्ञानम्	4	200-299
6.		गौणः 2.क.3: कारकप्रकरणम्	4	200-299
7.	तृतीयवर्षः गौणपाठ्यक्रमाः	गौणः 3.क.1: द्वैतवेदान्तसम्प्रदायस्य प्रमुखाः प्रवर्तकाः	4	300-399
8.		गौणः 3.क.2: अद्वैतवेदान्तदर्शनेतिहासः	4	300-399
9.		गौणः 3.क.3: विशिष्टाद्वैतवेदान्तदर्शनेतिहासः	4	300-399
10.	चतुर्थवर्षः गौणपाठ्यक्रमाः	गौणः 4.क.1: भारतीयज्ञानपरम्परा	4	400-499
11.		गौणः 4.क.2: मीमांसाप्रवेशिनी	4	400-499
12.		गौणः 4.क.3: न्यायसोपानम्	4	400-499
13.		गौणः 4.क.4: तर्कमतसौरभम्	4	400-499
14.		गौणः 4.क.5: शाब्दबोधप्रक्रिया	4	400-499

प्रथमवर्षः
(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः 100-199	श्रेयोऽङ्काः - 4 होराः - 60

प्रथमसत्रार्द्धः (SEMESTER – 1)

प्रधानः पाठ्यक्रमः (Major) 1.1: दर्शनस्य सामान्यपरिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course objectives)

1. भारतीयदर्शनानां मूलतत्त्वानां सम्यक्बोधनम्।
2. प्रमाण-प्रमेय-मोक्षस्वरूपाणां परिज्ञानम्।
3. वैदिकावैदिकदर्शनानां तुलनात्मकदृष्ट्या अवबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. दर्शनशब्दस्य व्युत्पत्तिं, श्रावक-नास्तिकपद्धतिषु दर्शनानां भेदं च व्याख्यातुं समर्थाः भविष्यन्ति।
2. भारतीयदर्शनानां सामान्यवर्णनं कर्तुं समर्थाः भविष्यन्ति।
3. भारतीय दर्शनानुसारं जगतः स्वरूपं वर्णयितुं शक्ष्यन्ति।
4. प्रमाणस्वरूपं प्रमेयस्वरूपं च सम्यक् व्याख्यातुं शक्ताः भविष्यन्ति।
5. प्रमाणस्वरूपं प्रमेयस्वरूपं च सम्यक् ग्रहीतुं शक्ताः भविष्यन्ति।
6. मोक्षस्य विविधस्वरूपाणां तथा तेषां साधनानां तुलनात्मकविवेचनं कर्तुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.1	दर्शनस्य सामान्यपरिचयः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. दर्शनानां सामान्यपरिचयः। **श्रेयोऽङ्कः १**

- दर्शनशब्दविचारः।
- वैदिकदर्शनम्।
- अवैदिकदर्शनम्।
- अनुबन्धचतुष्टयनिरूपणम्।

अन्वितिः २. आत्मनः जगतः च स्वरूपम्। **श्रेयोऽङ्कः १**

- आत्मनः स्वरूपम्।
- एकत्व-अनेकत्वादिवादः।

- ईश्वरः – सगुणः/निर्गुणः/अनुपस्थितः।
- जगत् – सत्कार्यवादः/असत्कार्यवादः।

अन्वितिः ३. प्रमेयाणां स्वरूपकथनम्। **श्रेयोऽङ्कः १**

- प्रमेयलक्षणम्।
- दर्शनेषु प्रमेयसङ्ख्याभेदाः।
- आत्मेन्द्रियाद्द्वादशप्रमेयस्वरूपम्।

अन्वितिः ४. मोक्षविचारः। **श्रेयोऽङ्कः १**

- मोक्षस्वरूपं (कैवल्यम्, अपवर्गः, आत्मलाभः)
- मोक्षसाधनानि।
- दर्शनेषु तुलनात्मकविचारः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. माधवाचार्यः (विद्यारण्यः), (2010), सर्वदर्शनसंग्रहः, वाराणसी : चौखम्बा।
2. नागसम्पिगे, ए. वि., & अडिगः, शङ्करनारायणः, (2012), षड्दर्शनसारः, बेङ्गलूरुः पूर्णप्रज्ञसंशोधनमन्दिरम्।
3. मिश्रः, प्रो. गोपबन्धु,(२०२०), शास्त्रपरिचायिका, वेरावलम् : श्रीसोमनाथसंस्कृतविश्वविद्यालयः।

सहायकाः ग्रन्थाः (Additional Readings)

1. त्रिपाठी, शिवदत्तः, भारतीयदर्शनों का इतिहास, वाराणसी : चौखम्बा विद्या भवन।
2. उपाध्याय, बलदेवः, भारतीयदर्शन – साङ्ख्य और योग, प्रयागराज : हिंदी साहित्य सम्मेलन।
3. दासगुप्त, सुरेन्द्रनाथः, भारतीयदर्शन (भाग–1), अनुवादकः – राधाकृष्ण शर्मा, दिल्ली : भारतीयज्ञानपीठ दिल्ली।

काठिन्यस्तरः 100-199

श्रेयोङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.2: न्यायदर्शनस्य सामान्यपरिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course bjectives)

1. न्यायदर्शनस्य सामान्यपरिचयः प्रमुखतत्त्वानाम् अवबोधनम्।
2. गौतममुनिप्रणीतन्यायसूत्राणां व्याख्यानक्रमावबोधनम्।
3. न्यायदर्शनाभिमतपदार्थानां विमर्शनम्।
4. प्राचीननव्यन्याययोः तुलनात्मकं विश्लेषणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. न्यायदर्शनाभिमतमूलसिद्धान्तानां स्पष्टं ज्ञानं प्राप्स्यन्ति।
2. न्यायपरम्पराणां वर्णनं कर्तुं शक्ष्यन्ति।
3. न्यायमते प्रमेयानाम् अवधारणां स्पष्टकर्तुं शक्ष्यन्ति।
4. न्यायमते प्रत्यक्षानुमानप्रमाणादीनां विश्लेषणकर्तुं समर्थाः भविष्यन्ति।
5. वादप्रक्रियां ज्ञात्वा वादकथाप्रदर्शने समर्थाः भविष्यन्ति।
6. हेत्वाभासनिग्रहस्थानादीनां सम्यग्ज्ञानेन पक्षान्तरे दोषान् उद्भावयितुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.2	न्यायदर्शनस्य सामान्यपरिचयः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. न्यायपरम्परा। **श्रेयोऽङ्कः १**

- प्राचीनन्यायपरम्परा।
- नव्यन्यायपरम्परा।
- दर्शनान्तरेषु न्यायस्य स्थानम्।
- मङ्गलवादः।

अन्वितिः २. न्यायमते प्रमेयाः। **श्रेयोऽङ्कः १**

- पदार्थविवेचनम्।
- आत्मविवेचनम्।
- परमाणुविवेचनम्।
- ज्ञानविवेचनं, मोक्षः, तत्साधनानि च।

अन्वितिः ३. न्यायमते प्रमाणानि (तर्कभाषायां प्रमाणलक्षणाद् अर्थापत्तिपृथक्प्रमाणत्वखण्डनं यावत्)
श्रेयोऽङ्कः १

- प्रमाणस्वरूपम्।
- प्रत्यक्षप्रमाणम्।
- अनुमानप्रमाणम्।
- शब्द-अर्थापत्ति-प्रमाणे।

अन्वितिः ४. वादप्रक्रिया (तर्कभाषायां तत्त्वबुभुत्सोः कथा इत्यारभ्यतः निग्रहस्थाननिरूपणान्तम्)
श्रेयोऽङ्कः १

- कथाप्रकाराः।
- हेत्वाभासः।
- जातिः, निग्रहस्थानञ्च।
- न्यायशास्त्रस्य उपसंहारः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. अन्नम्भट्टः, तर्कसङ्ग्रहः, वाराणसी : चौखम्बा संस्कृत प्रकाशन।
2. केशवमिश्रः, तर्कभाषा, वाराणसी : चौखम्बा संस्कृत प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. विश्वनाथपञ्चाननभट्टाचार्यः, (2003), न्यायसिद्धान्तमुक्तावली, वाराणसी : चौखम्बा संस्कृत संस्थानम्।
2. श्रीकृष्णावधूतपण्डितः, (2006), तर्कनवनीतम्, सम्पादकौ – डा. श्रीनिवासः वरखेडी, डा. वीरनारायणः पाण्डुरङ्गी, बेङ्गलूरुः : पूर्णप्रज्ञसंशोधनमन्दिरम्।
3. अन्नम्भट्टः, (2012), तर्कसङ्ग्रहः, सम्पादकौ – डा. ए. वि. नागसम्पिगे, डा. माधवाचार्यः पाण्डुरङ्गी, बेङ्गलूरुः : पूर्णप्रज्ञसंशोधनमन्दिरम्।
4. दासगुप्त, एस्. एन्., (2012), भारतीय दर्शन का इतिहास, जयपुर : राजस्थान हिन्दी ग्रन्थ अकादमी।
5. गौतमः, महर्षिः, (2018), न्यायदर्शनम्, सम्पादकः – आचार्य ढुण्ढिराज शास्त्री, वाराणसी : चौखम्बा संस्कृत भवनम्।
6. गौतमः, महर्षिः, (2021), न्यायदर्शनम्, सम्पादकः - आचार्य उदयवीर शास्त्री।

काठिन्यस्तरः 100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.3: वैशेषिकदर्शनस्य सामान्यपरिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. कणादमुनिप्रतिपादितस्य सप्तपदार्थसिद्धान्तस्य बोधनम्।
2. वैशेषिकाभिमतानां प्रमाणप्रमेयादीनां बोधनम्।
3. न्यायवैशेषिकमतयोः साम्यवैषम्यचिन्तनम्।
4. प्रशस्तपादभाष्यानुसारं मोक्षतत्साधनयोः बोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वैशेषिकदर्शनस्य मूलसिद्धान्तानां विश्लेषणकर्तुं शक्ष्यन्ति।
2. पदार्थानां वर्णयितुं शक्ष्यन्ति।
3. नवद्रव्याणां स्वरूपविवेचयितुं समर्थाः भविष्यन्ति।
4. वैशेषिकाभिमतप्रमाणानां प्रत्यक्षानुमानशब्दादीनां विश्लेषणे समर्थाः भविष्यन्ति।
5. मोक्षसाधनानां व्याख्यातुं सिद्धाः भविष्यन्ति।
6. वैशेषिकसूत्राणां व्याख्याने समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.6	वैशेषिकदर्शनस्य सामान्यपरिचयः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. वैशेषिकदर्शनस्य मूलसिद्धान्ताः। **श्रेयोऽङ्कः १**

- कणादमुनिप्रणीताः सप्तपदार्थाः।
- परमाणुवादस्य वैशेषिकदृष्टिः।
- न्यायवैशेषिकयोः सम्बन्धः।
- दर्शनान्तरेषु वैशेषिकदर्शनस्य स्थानम्।

अन्वितिः २. पदार्थविज्ञानम्। **श्रेयोऽङ्कः १**

- नवद्रव्याणां स्वरूपविवेचनम्।
- चतुर्विंशतिगुणानां विश्लेषणम्।

- पञ्चकर्मसु यथार्थज्ञानम्।
- अन्यपदार्थानां विश्लेषणम्।

अन्वितिः ३. प्रमाणविचारः। **श्रेयोऽङ्कः १**

- वैशेषिकनये प्रत्यक्षानुमानोपमानानां स्वरूपविवेचनम्।
- शब्दप्रमाणस्य स्वरूपम्।
- अर्थापत्त्यनुपलब्धिप्रमाणयोः स्थानम्।

अन्वितिः ४. मोक्षसाधनानि। **श्रेयोऽङ्कः १**

- आत्मनः स्वरूपम्।
- चतुर्विधदुःखनिवृत्तिः।
- धर्माधर्मयोः परमाणुसम्बन्धः।
- मोक्षस्य स्वरूपम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. कणादमुनिकृतं वैशेषिकसूत्रम्, वाराणसी : चौखम्बा संस्कृत प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. श्रीधराचार्य, (1995), न्यायकन्दलीः, मोतीलाल बनारसीदास।
2. प्रशस्तपाद, (2005), पदार्थधर्मसंग्रहः, राष्ट्रीय संस्कृत संस्थानम्।
3. विश्वनाथ पञ्चानन, (2008), भाषापरिच्छेदः, कृष्णदास अकादमी।
4. कणाद (2010), वैशेषिकसूत्राणि, डॉ. धर्मेन्द्रनाथ शास्त्री (सं.), चौखम्बा संस्कृत प्रतिष्ठान।
5. शर्मा, उ. (2015), वैशेषिकदर्शनस्य इतिहासः, दिल्ली विश्वविद्यालय।

काठिन्यस्तरः 100-199	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.4: साङ्ख्यदर्शनस्य सामान्यपरिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. साङ्ख्यदर्शनस्य सामान्यपरिचयः प्रमुखतत्त्वानां च अवबोधनम्।
2. साङ्ख्यदर्शनमूलसिद्धान्तानां (दुःखत्रयं, प्रकृतिपुरुषविवेकः, तत्त्वोत्पत्तिः इत्यादीनां) ज्ञानप्रदानम्।
3. साङ्ख्यदर्शनस्य प्रमुखप्रमाणप्रमेयाणां परिचयप्रदानम्।
4. प्रकृतिपुरुषविवेकेन व्यावहारिकसमस्यानां समाधानान्वेषणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. साङ्ख्यतत्त्वानां विश्लेषयितुं समर्थाः भविष्यन्ति।
2. साङ्ख्यदर्शनस्य पञ्चविंशतितत्त्वानि स्वशब्दैः विचारणे समर्थाः भविष्यन्ति।
3. प्रकृतिपुरुषयोः स्वरूपवर्णयितुं क्षमाः भविष्यन्ति।
4. तत्त्वोत्पत्तिक्रमाणां वर्णयितुं शक्ष्यन्ति।
5. इन्द्रियविचाराणां विश्लेषणकर्तुं शक्ष्यन्ति।
6. साङ्ख्यसिद्धान्तोक्तबन्धमोक्षयोः विमर्शनं तथा आधुनिकजीवने तयोः उपयोगितां प्रतिपादयितुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.4	साङ्ख्यदर्शनस्य सामान्यपरिचयः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. साङ्ख्यतत्त्वविचारः। **श्रेयोऽङ्कः १**

- दुःखत्रयविवेचनम्।
- दुःखनिवृत्तेः उपायाः।
- तत्त्वानां परिचयः।
- विवेकज्ञानम्।

अन्वितिः २. प्रकृतिपुरुषयोः स्वरूपविवेचनम्। **श्रेयोऽङ्कः १**

- प्रकृतेः लक्षणम्।
- पुरुषस्य स्वरूपम्।
- प्रकृतिपुरुषसम्बन्धः।
- पुरुषबहुत्वम्।

अन्वितिः ३. तत्त्वोत्पत्तिक्रमः इन्द्रियविचारश्च। **श्रेयोऽङ्कः १**

- महत्तत्त्वविचारः।
- अहङ्कारतत्त्वस्य विचारः।
- तन्मात्राणां स्वरूपम्।
- इन्द्रियविचारः।

अन्वितिः ४. बन्धमोक्षनिरूपणं कैवल्यप्राप्तिश्च। **श्रेयोऽङ्कः १**

- बन्धकारणम्।
- मोक्षसाधनम्।
- कैवल्यस्वरूपम्।
- साङ्ख्यशास्त्रस्य उपसंहारः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. ईश्वरकृष्णः, (1933), *साङ्ख्यकारिका,* सम्पादकः – डा. हरिदत्तशर्मा, पुण्यनगरम्: ओरिएण्टल् पुस्तक संस्था।

सहायकाः ग्रन्थाः (Additional Readings)

1. वाचस्पतिमिश्रः, (2010), साङ्ख्यतत्त्वकौमुदी, सम्पादकः – रामशंकरभट्टाचार्यः, दिल्ली : मोतीलालबनारसीदासः।
2. माधवाचार्यः (विद्यारण्यः), (2010), सर्वदर्शनसंग्रहः, वाराणसी : चौखम्बा।
3. कपिलमुनिः, (2022), सांख्यदर्शनम्, सम्पादकः – रामशंकरभट्टाचार्यः, दिल्ली : भारतीय बुक् कार्पोरेशन्।

काठिन्यस्तरः 100-199	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.5: प्रायोगिकं योगदर्शनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. योगदर्शनस्य सामान्यपरिचयः प्रमुखतत्त्वानाम् अवबोधनम्।
2. योगदर्शनस्य चित्तादीनां परिचयः तस्य महत्त्वावबोधनञ्च।
3. आसनप्राणायामध्यानानां प्रायोगिकज्ञानसम्पादनम्।
4. शरीरमनस्सन्तुलनस्य अभिवृद्धये योगशास्त्रस्य दैनिकजीवने अनुप्रयोगः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. दैनन्दिनजीवने आसनानां महत्त्वं विश्लेषयितुं समर्थाः भविष्यन्ति।
2. प्रमुखानां पञ्चदशासनानां नामरूपलक्षणविवेचने समर्थाः भविष्यन्ति।
3. नाडिशोधनप्रकाराणां विधिपूर्वकम् अनुष्ठातुं समर्थाः भविष्यन्ति।
4. मुद्राषट्कर्मणां वर्णयितुं शक्ष्यन्ति।
5. दण्डक्रियादीनां व्यवहारिकज्ञानं विवेचयितुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.5	प्रायोगिकं योगदर्शनम्	03	0	01	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. सूर्यनमस्कारः, आसनानि च। **श्रेयोऽङ्कः १**

- सूर्यनमस्कारः।
- नौकासनं, पवनमुक्तासनम्, उत्थानपादासनम्।
- पादवृत्तासनं, चक्रिकासनम्, अर्धहलासनं, हलासनम्।
- सेतुबन्धासनं, सर्वाङ्गासनं, मत्स्यासनं, चक्रासनं, शवासनम्।

अन्वितिः २. प्राणायामः। **श्रेयोऽङ्कः १**

- नाडिशोधनम् (निश्चित-अन्यतर-नासापुटेन श्वासोच्छ्वासः)
- नाडिशोधनम् (अन्यतर-नासापुटेन श्वासोच्छ्वासः)

- नाडिशोधनम् (अन्यतर-नासापुटेन श्वासोच्छवासः, आन्तरकुम्भकश्च)
- नाडिशोधनम् (पूरकः, आन्तरकुम्भकः, रेचकः, बाह्यकुम्भकश्च)

अन्वितिः ३. मुद्राः षट्कर्माणि च। **श्रेयोऽङ्कः १**

- हस्तमुद्राः – चित्-ज्ञान-हृदय-भैरव-योनि-मुद्राः चेति।
- हस्तमुद्राः – प्राण-अपानवायु-शङ्ख-कामजयी-मुद्राः चेति।
- षट्कर्माणि – नेतिः (जलनेतिः, सूत्रनेतिः)

अन्वितिः४. दण्डक्रिया। **श्रेयोऽङ्कः १**

- सामान्यदण्डः, राममूर्तिदण्डः, हनुमानदण्डः।
- वृश्चिकदण्डः, पार्श्वदण्डः, चक्रदण्डः।
- विपरीतदण्डः, सर्पदण्डः, मिश्रदण्डः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. सरस्वती, एस्. एस्., (2006), आसन प्राणायाम एण्ड् मुद्रा बन्ध, बिहार : योगपब्लिकेशन् ट्रस्ट्।
2. रणदेव, वैयएस्., (2015), दण्ड बैठक, हरिद्वारम् : दिव्यप्रकाशनम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. आचार्यबालकृष्णः, (2015), दैनिकयोगाभ्यासक्रम, हरिद्वार : दिव्यप्रकाशनम्।

काठिन्यस्तरः 100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.6: दर्शनशास्त्रस्येतिहासः (नास्तिकम्)

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयदर्शनस्य वैशिष्ट्यस्य प्रतिपादनम्।
2. नास्तिकदर्शनस्य प्रमुखसिद्धान्तानामवगमनम्।
3. बौद्धदर्शनस्य सामान्यपरिचयप्रदानम्।
4. जैनचार्वाकयोः प्रमुखविचाराणां बोधनम्।
5. आत्मा-मोक्ष-ज्ञानादिविविधदृष्टीनां परिज्ञानम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. दर्शनशास्त्रस्य परिचयप्रदाने समर्थाः भविष्यन्ति।
2. चार्वाकदर्शने सुख-मोक्षादिविचारान् वक्तुं शक्ष्यन्ति।
3. बुद्धस्य जीवनचरितं वक्तुं समर्थाः भविष्यन्ति।
4. जैनबौद्धदर्शनयोः प्रमुखवादान् प्रतिपादयितुं सिद्धाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.6	दर्शनशास्त्रस्येतिहासः (नास्तिकम्)	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १: परिचयः। **श्रेयोऽङ्कः १**

- दर्शनशब्दस्य व्युत्पत्तिः परिभाषाः च।
- दर्शनशास्त्रस्य आवश्यकता।
- आस्तिक–नास्तिकदर्शनभेदनिरूपणम्।
- नास्तिकदर्शनस्य वैशिष्ट्यम्।

अन्वितिः २: चार्वाकदर्शनम्। **श्रेयोऽङ्कः १**

- चार्वाकलोकायतनामकरणम्।
- सुखस्वरूपम्।
- ईश्वरः, मोक्षः आत्मा च।
- प्रत्यक्षप्रमाणनिरूपणम्।

अन्वितिः ३: बौद्धदर्शनम्। **श्रेयोऽङ्कः १**

- बुद्धस्य जीवनचरितम्।
- चत्वारि आर्यसत्यानि।
- चत्वारः बौद्धसम्प्रदायाः तेषां वादाश्च।
- प्रतीत्यसमुत्पादः।
- नैरात्म्यवादः।
- चित्तं तद्विकाराश्च।

अन्वितिः ४: जैनदर्शनम् (आर्हतदर्शनम्) **श्रेयोऽङ्कः १**

- अनेकान्तवादः।
- स्याद्वादः।
- जैनदर्शने तत्त्वानि।
- मोक्षस्वरूपविचारः।
- सप्तभङ्गीनयः।

निर्धारिताः गन्थाः (Essential/Recommended Readings/Texts)

1. ऋषि, प्रो. उमाशङ्करशर्मा, (1964), सर्वदर्शनसङ्ग्रह, वाराणसी : चौखम्बा विद्याभवन।
2. श्रीवास्तव, आर्.डी., दर्शनशास्त्र का इतिहास, प्रयाग : शारदा प्रैस्।
3. C.D. Sharma - *A Critical Survey of Indian Philosophy*
4. S. Radhakrishnan - *Indian Philosophy* (2 Vols.)
5. Surendranath Dasgupta - *History of Indian Philosophy* (5 Vols.)
6. बलदेव उपाध्याय - *भारतीय दर्शन*।
7. विश्वनाथ मिश्र - *भारतीय दर्शन का संक्षिप्त इतिहास*।

काठिन्यस्तरः 100-199	श्रेयोऽङ्काः - 4 होराः - 60

द्वितीयसत्रार्द्धः (SEMESTER - 2)

प्रधानः पाठ्यक्रमः (Major) 1.7: बौद्धदर्शनस्य सामान्यपरिचयः

पाठ्यक्रमस्य उद्देश्यानि (Course bjectives)

1. बौद्धदर्शनस्य सामान्यपरिचयः प्रमुखतत्त्वानां च परिज्ञानम्।
2. बौद्धदर्शनस्य मूलसिद्धान्तपरिचयः तथा महत्त्वावबोधनम्।
3. बौद्धदर्शनस्य प्रमुखप्रमाणप्रमेयाणां परिचयप्रदानम्।
4. बौद्धसम्प्रदायगतानाम् आचारविचाराणां बोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. महायानदर्शनस्य वर्णयितुं शक्ष्यन्ति।
2. प्रमुखानां महायानसूत्राणां विश्लेषयितुं समर्थाः भविष्यन्ति।
3. बोधिचित्तस्य स्वरूपं तद्भेदाश्च वर्णयितुं शक्ष्यन्ति।
4. शून्यवादस्य स्वरूपं महत्त्वञ्च विश्लेषयितुं समर्थाः भविष्यन्ति।
5. महायानदर्शने निर्वाणस्वरूपम् व्याख्यातुं क्षमाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1. 7	बौद्धदर्शनस्य सामान्यपरिचयः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. महायानदर्शनस्य परिचयः। **श्रेयोऽङ्कः १**

- महायानदर्शनस्य उद्भवो विकासश्च।
- हीनयान-महायानयोः भेदः।
- शून्यवादस्य मूलसिद्धान्तः।
- प्रमुखानां महायानसूत्राणां परिचयः (अष्टसाहस्रिका-प्रज्ञापारमितासूत्रं, सद्धर्मपुण्डरीकसूत्रं, ललितविस्तरसूत्रं, लङ्कावतारसूत्रं, सुवर्णप्रभाससूत्रं, गण्डव्यूहसूत्रं, तथागतगर्भसूत्रं, दशभूमिकासूत्रं, समाधिराजसूत्रम् इत्यादि)

अन्वितिः २. बोधिचित्तं बोधिसत्त्वञ्च। **श्रेयोऽङ्कः १**

- बोधिचित्तस्य स्वरूपं तद्भेदाश्च।
- बोधिचित्तोत्पादः बोधिसत्त्वस्य च स्वरूपम्।
- षट्पारमिताः (दानं, शीलं, क्षान्तिः, वीर्यं, ध्यानं, प्रज्ञा च)
- करुणा-प्रज्ञयोः समन्वयः बोधिसत्त्वमार्गस्य च व्यावहारिकं महत्त्वम्।

अन्वितिः ३. शून्यता-त्रिकायसिद्धान्तौ। **श्रेयोऽङ्कः १**

- शून्यवादस्य स्वरूपं नागार्जुनस्य च योगदानम्।
- माध्यमिक-योगाचारदर्शनयोः संक्षिप्तपरिचयः।
- त्रिकायसिद्धान्तः –
  - धर्मकायः।
  - सम्भोगकायः।
  - निर्माणकायः।
- शून्यतादृष्ट्या नैरात्म्यवादः।

अन्वितिः ४. निर्वाणम्। **श्रेयोऽङ्कः १**

- महायान-दर्शने निर्वाणस्वरूपम्।
- बोधिसत्त्व-मार्गेण मोक्षप्राप्तिः।
- विश्वकल्याणाय बौद्धदृष्टिः।
- महायानस्य वैश्विकप्रभावः आधुनिकसन्दर्भे च महायानस्य प्रासङ्गिकता।

निर्धारिताः ग्रन्थाः(Essential/Recommended Readings/Texts)

1. सङ्घसेनसिंहः, (2020), बौद्धदर्शनप्रवेशिका, दिल्ली : भारतीय बुक कार्पोरेशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. नागार्जुनः, (2012), मध्यमककारिका, सम्पादकः – डा. रामशंकरत्रिपाठी, दिल्ली : मोतीलाल बनारसी दास।
2. सत्यव्रतशास्त्री, डा., (2015), प्रज्ञापारमिताहृदयसूत्रम्, सम्पादकः – डा. सत्यव्रतशास्त्री, दिल्ली : भारतीयविद्याप्रकाशनम्।
3. परशुरामशर्मा, डा., (2018), लङ्कावतारसूत्रम्, वाराणसी : चौखम्बा संस्कृत संस्थानम्।
4. रामशंकरत्रिपाठी, प्रो., (2015), बौद्धदर्शनप्रस्थान, सारनाथ : केन्द्रीय उच्च तिब्बती शिक्षा संस्थानम्।

काठिन्यस्तरः 100-199	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.8: अद्वैतवेदान्तस्य मूलतत्त्वानि

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वेदान्तसारस्य कर्तुः सदानन्दयोगीन्द्रस्य विषये ज्ञानसम्पादनम्।
2. वेदान्तसारे वर्णितानां वेदान्तविषयाणाम् अवगमनम्।
3. अद्वैतवेदान्तशास्त्रे प्रयुक्तानां पारिभाषिकशब्दज्ञानसम्पादनम्।
4. महावाक्यार्थबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वेदान्तस्य सामान्यज्ञानं वर्णयितुं शक्ष्यन्ति।
2. वेदान्तरीत्या अज्ञानस्य तत्कार्याणां सम्बद्धावधारणां विश्लेषयितुं समर्थाः भविष्यन्ति।
3. अनुबन्धचतुष्टयस्य विवर्त्तपरिणामवादयोः स्फुटं ज्ञानं प्राप्स्यन्ति।
4. अध्यारोप-अपवादयोः बोधं प्राप्स्यन्ति।
5. अज्ञानस्य शक्तिद्वयं, तत्कार्यम्, अवस्थात्रयं, कोशपञ्चकम् इत्यादिविषयान् वर्णयितुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.8	अद्वैतवेदान्तस्य मूलतत्त्वानि	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. वेदान्तसम्प्रदायस्य परिचयः। **श्रेयोऽङ्कः १**

- वेदान्तशब्दार्थः।
- आचार्याणां परम्परा।
- आदिशङ्कराचार्यस्य जीवनवृत्तम्।
- अन्यवेदान्तसम्प्रदायाः।
- प्रस्थानत्रयम्।
- अनुबन्धचतुष्टयम्।
- गुरूपसदनम्।

अन्वितिः२. वेदान्तरीत्या अज्ञानस्य तत्कार्याणां च निरूपणम्। श्रेयोऽङ्कः १

- अध्यारोपः अपवादश्च।
- अज्ञानस्य लक्षणम्।
- समष्टिव्यष्टिरूपत्वम्।
- अज्ञानस्य शक्तिद्वयम्।
- सृष्टिक्रमः।
- सूक्ष्मशरीरोत्पत्तिः।
- पञ्चीकरणम्।
- स्थूलप्रपञ्चोत्पत्तिः।

अन्वितिः ३. आत्मनः स्वरूपं वाक्यार्थविचारश्च। श्रेयोऽङ्कः १

- पुत्रादीनाम् आत्मत्वखण्डनम्।
- लक्षणास्वरूपम्।
- जहदजहल्लक्षणयोः निरासः।
- भागलक्षणासमर्थनम्।

अन्वितिः ४. वाक्यार्थविचारः, जीवन्मुक्तश्च। श्रेयोऽङ्कः १

- महावाक्यार्थविचारः।
- श्रुत्यविरोधनिरूपणम्।
- श्रवणादिसाधननिरूपणम्।
- यमादिसाधनानि।
- जीवन्मुक्तलक्षणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. श्रीनृसिंहसरस्वती (वि.), (वि. श्रीरामतीर्थः), वेदान्तसारः (विद्वन्मनोरञ्जन्या सहित सुबोधिनी टीका सहित), वाराणसी : चौखम्बा कृष्णदास अकादमी।
2. सदानन्दरयोगीन्द्रः, (व्याख्याकारः आचार्य बदरीनाथ शुक्लः), वेदान्तसारः (हिन्दी व्याख्यासहितः), वाराणसी : मोतीलाल बनारसीदास।

सहायकाः ग्रन्थाः (Additional Readings)

1. रामशरणत्रिपाठी शास्त्री, वेदान्तसारः ('भावबोधिनी' संस्कृत-हिन्दी टीका सहित), वाराणसी : चौखम्बा विद्याभवन।
2. गजाननशास्त्री मुसलगांवकर, वेदान्तसारः ('सारबोधिनी', 'विमला' संस्कृत-हिन्दी व्याख्योपेतः), वाराणसी : चौखम्बा कृष्णदास अकादमी।

3. रामशरणत्रिपाठी शास्त्री, वेदान्तसारः (भावबोधिनी संस्कृत व्याख्योपेतः), वाराणसी : चौखम्बा विद्या भवन।
4. लघुवासुदेवमननम्, संशोधकः ब्रह्मश्री सुब्रह्मण्यशास्त्रिः, श्रीरङ्गम्: श्रीवाणीविलास मुद्रायन्त्रालयः।
5. विवेकचूडामणिः (हिन्दी अनुवाद सहित), गोरखपुर : गीताप्रेस।
6. अपरोक्षानुभूतिः (हिन्दी अनुवाद सहित), गोरखपुर : गीताप्रेस।
7. स्वामी निखिलानन्दः, वेदान्तसारः (आङ्ग्लानुवादकः), कलकत्ता : अद्वैत आश्रम।।

काठिन्यस्तरः 100-199	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.9: विशिष्टाद्वैतवेदान्तस्य मूलतत्त्वानि

पाठ्यक्रमस्य उद्देश्यानि (Course bjectives)

1. विशिष्टाद्वैतदर्शनस्य सामान्यपरिचयः प्रमुखतत्त्वानाम् अवबोधनञ्च।
2. विशिष्टाद्वैतदर्शनस्य प्रमेयपरिचयः तस्य महत्त्वावबोधनञ्च।
3. विशिष्टाद्वैतदर्शनस्य प्रमाणानां परिचयप्रदानम्।
4. विशिष्टाद्वैतसम्प्रदायगतानाम् आचारविचाराणां बोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. विशिष्टाद्वैतदर्शनस्य मूलं परम्पराञ्च वर्णयितुं शक्ष्यन्ति।
2. विशिष्टाद्वैतदर्शनप्रतिपादिततत्त्वानि निरूपयितुं समर्थाः भविष्यन्ति।
3. शब्दप्रमाणस्य वर्णयितुं शक्ष्यन्ति।
